अर्थ-जनकजी बोले कि ब्रह्मवादियोंके मध्यमें यह वाद कैसे भया और विष्णुरात (परीक्षित) जीके लिये आपने कैसे पूर्वमें बोध किया और गोलोकधाम करके परमस्थान क्या है ? जहां परीक्षित जी हैं यह सब मेरेको हे भगवन् ! करुणास्थान शुकदेवजी ! कहिये यह वचन बहुलाश्व राजाके सुनकर शुकाचार्य स्वामीजी बोले ॥

पुराहं ब्रह्मणो लोके उपित्वा शाश्वतीः समाः ॥
ब्रह्मवादे जायमाने सिद्धांते ब्रह्मवादिनाम् ॥ १६६ ॥
रामः सर्वं हरिः सर्वमित्यश्रौपं मुहुर्मुहुः ॥
ततः श्वेतद्वीपपतेरनिरुद्धस्य संसदि ॥ १६७ ॥
ब्रह्मप्रसंगवार्तासु राम एव विधिः श्रुतः ॥
राम एव सदा ध्येयो ज्ञेयः सेव्यश्च साधुभिः ॥ १६८ ॥
इत्यश्रौपमहं राजन् सिद्धांतेषु मुहुर्मुहुः ॥
ततोऽनंतस्य शेपस्य साक्षान्नारायणात्मनः ॥ १६९ ॥
सदा सुसंगतोऽश्रौपं राममेव कथाविधिम् ॥
नातः परतरं वेद्यं रामत्रैलोक्यनायकात् ॥ १७० ॥
एक एव परं ब्रह्म रामो वेदेषु गीयते ॥
इति श्रुत्वा विनिश्चित्य श्रीरामचरितं मया ॥ १७१ ॥
निर्मथ्य सर्वशास्त्रेषु संचितं पठितं स्मृतम् ॥
स्थापितं हृदये नित्यं सर्वस्वं प्राणजीवनम् ॥ १७२ ॥

अर्थ-शुकाचार्य्यजी बोले कि पूर्वकाल में ब्रह्मलोकमें ब्रह्मवादियोंके मध्यमें ब्रह्मवाद विषय सर्वदा यही सुना कि श्रीराम ही सर्वके दुःख हर्ता हरि भगवान् हैं ऐसा सबके मुखसे बार बार सुना फिर तिसके पीछे श्वेतद्वीपाधिपति अनिरुद्धके पासमें ब्रह्मप्रसंगकी वार्तामें सुना कि राम ही परब्रह्म सबके ध्यान करने योग्य हैं और साधुओं करके राम ही सेव्य हैं । हे राजन् ! ऐसा सिद्धान्त मैंने

वार वार सुना है फिर तिसके वाद साक्षात् नारायण भगवान्‌के आत्मा शेषजीके मुखसे सत्संगद्वारा रामहीकी कथा विधि सुना, कि राम परब्रह्म सबसे परे हैं रामजीसे परे कुछ नहीं है, एक परब्रह्म रामहीहैं ऐसा वेदमें कहा है ऐसा मैंने निश्चय पूर्वक राम चरित्र सुनकर और स्वयं सर्व शास्त्रमें मथकर एकत्र किया और पढ सुनकर नित्य हृदयमें स्थापित किया है। सर्वस्व प्राण जीवन राम ही हैं।

कदाचिद्गोलोकमध्ये जातोऽहं स्वेच्छया नृप ॥
जाता गावः कामदुघाः शाखिनः कल्पशाखिनः॥ १७३ ॥
यत्र वृन्दावनं नाम साक्षात्कृष्णवनं महत् ॥
यत्र गोवर्द्धनगिरिर्मणिधातुविचित्रितः ॥ १७४ ॥
यत्र कल्लोककलिता कालिन्दी सरितां वरा ॥
तस्यास्तीरेषु पुष्पाढ्यं कदंबद्रुमकानने ॥ १७५ ॥
यत्र रासरसाऽवेशमत्ताः श्रीगोकुलांगनाः ॥
यत्र क्रीडति कैशोरवेषः श्रीकृष्णचंद्रमाः ॥ १७६ ॥
मुरलीवादनपरो रूपमाधुर्य्यवारिधिः ॥
लीलाधिदेवता तस्य यत्र श्रीवृषभानुजा ॥ १७७ ॥
सुंदरी राधिका नाम रतिकोटिविचत्वरा ॥
यत्र लीलारसांभोधौ ब्रह्मानंदसुधाकणः ॥ १७८ ॥
न ज्ञायते कविकल्पैर्भक्तिसारैकवेदिभिः ॥
गोपेन्द्रो यत्र नंदाख्यस्तस्य घोषाः सभादयः ॥ १७९ ॥
दिवानिशं प्रवर्द्धिष्णुर्महामंगलमंडितः ॥
कृष्णवात्सल्यरसभूर्यशोदा यस्य गेहिनी ॥ १८० ॥ ॥
महाभाग्या महोदारा यत्र गोपा मुदान्विताः ॥
न यत्र म्रियते कश्चित्कालमायातिगेऽद्भुते ॥ १८१ ॥

अर्थ-शुकाचार्यजी बोले कि हे नृप! कभी गोलोकके मध्यमें अपनी इच्छासे मैं गया तो देखा कि जहां हजारों कामधेनु गौ जहां तहां घूम रहीहैं सबही वृक्ष कल्प वृक्षके समान हैं। जहां साक्षात्‌कृष्णचन्द्रके महान् वन वृन्दावन शोभित हैं जहां गोवर्धन पर्वत मणि धातुओं करके विचित्रित है जहां नदियोंमें श्रेष्ठ श्रीयमुनाजी सुन्दर कल्लोल कररही हैं उसके तीरमें पुष्पोंसे युक्त सुन्दर कदम्ब वन हैं।

जहां रासके रसमें उन्मत हजारों व्रजस्त्रीगण हैं जहां किशोर श्रीकृष्णचन्द्रम क्रीडा करतेहैं । मुरली बजानेमें तत्पर रूप माधुर्य्यताके सागर हैं, जहां लीलाकी स्वामिनी श्री वृषभानुकी पुत्री अतिसुंन्दरी कोटि रतिको चकित करनेवाली श्रीराधिका नामवाली हैं । जहां लीलारसके सागरमेंसे ब्रह्मानन्दसुख सुधाकण हैं इसको बडे २ कवि ज्ञानी लोग नहीं जान सकते हैं केवल एक भक्तिसारहीसे जानतेहैं भक्ति बिना जानना कठिन है जहां सब गोपोंमें श्रेष्ठ श्रीनंद हैं तिनके सभामण्डली करके शब्द होरहा है। दिनरात्रि महा मंगल शोभासे वृद्धि होरही हैं और श्रीकृष्णजीके वात्सल्यरसमें नन्दजीकी स्त्री श्रीयशोदाजी मग्न हैं महाभाग्यवाले परम उदार जहां गोपलोग आनन्द करके युक्त हैं जहां कोई नहीं मरतेहैं काल और मायासे रहित हैं किसीका गम नहीं है वडा अद्भुत है ॥

अलौकिको यत्र रविर्बोधयत्यंबुजाकरम् ॥
तथा विलक्षणश्चन्द्रो भुंक्ते कैरविणीर्निशि ॥ १८२ ॥
नित्योत्साहो नित्यसुखं नित्यकेलिरसोदयः ॥
नित्यनव्यतरं रूपं नवीनं यत्र मंगलम् ॥ १८३ ॥
तत्र गत्वा समाश्रित्य दिव्यश्रीयमुनाजले ॥
वंशीवटतरोर्मूले नटंतं श्यामसुन्दरम् ॥ १८४ ॥
ददर्श गोपिकावृन्दैः सह रंजितकाननम् ॥
तत्र ब्रह्मादयो देवाः कोटिजन्मार्जितैः शुभैः ॥ १८५ ॥
गोपिकाभावमासाद्य रमणं रमयंति ह ॥
ऋषयः श्रुतयश्चैव गोपिकाभावभाविताः ॥ १८६ ॥
क्रीडंति प्रभुणा साकं महासौभाग्यमंडिताः ॥
तत्र गत्वा रसावेशादुच्चैर्गानकलस्वरैः ॥ १८७ ॥
अतीव रंजयामास गोपीमाधवयोर्मनः ॥
दृष्टो मया च तत्रैव पाण्डवेयो महामनाः ॥ १८८ ॥
परीक्षिन्नाम नृपतिः श्रुत्वा भागवतं पुरा ॥
श्रीभागवतवक्तारं ववंदे मां पुरातनम् ॥ १८९ ॥

अर्थ-जहां अलौकिक सूर्य कमलोंको प्रफुल्लित कररहेहैं तैसे ही विलक्षण चन्द्रमा भी कुमुदिनीके रस लेरहे हैं । जहां नित्य उत्साह नित्य सुख नित्य रसक्रीडादि

उदय होतेहैं नित्य नवीन रूप नित्य नवीन मंगल हैं। तहां जाकरके दिव्य श्रीयमुनाजीके जलमें स्नानादि कर वंशीवटवृक्षके मूलमें नृत्य करते हुये श्यामसुन्दरको और गोपियोंके समूह चारों ओर वनको प्रकाश करतेहुए सबको देखा तहां ब्रह्मादिक देवता सब कोटि जन्मोंके संचित पुण्य करके गोपिकाभावमें प्राप्त होकर सुन्दर विहार कररहे हैं और दण्डकवनवासी ऋषिलाग, श्रुति सब गोपिकाभावमें भावित होरहे हैं सब मिलकर प्रभुके साथ महासौभाग्य करके शोभित क्रीडाकरतेहैं तहां जाकर रससे परिपूर्ण हो खूब ऊंचे स्वरसे गान करतेभये गोपीके मन और माधवके मन आनंदको प्राप्त होगया तहींपर महामनवाले पाण्डवेयको मैंने देखा। तब परीक्षित् राजा मेरेसे पूर्वकालविषय श्रीभागवत सुना रहा सो श्रीभागवतके पुरातन वक्ता जान मेरेको नमस्कार किया और हाथजोड प्रेमसे बोला। राजोवाच ॥

भगवंस्त्वत्प्रसादेन श्रुतं भागवतं मया ॥
नित्य लीलालयो वासो लब्धो गोलोकसंज्ञकः ॥ १९० ॥
कृतार्थीकृत एवाहं भवता करुणात्मना ॥
एष मे प्रश्नविषयो वर्त्तते मुनिसत्तम ॥ १९१ ॥
कदाचिदिह खेलंतं कृष्णं वृंदावने वने ॥
आगतः पुरुषः कोऽपि स्निग्धश्यामलविग्रहः ॥ १९२ ॥
समानरूपमाधुर्य्यः समवीर्य्यवयोगुणः ॥
चापेषुधिधरो वीरो वामे च प्रिययान्वितः ॥ १९३ ॥
तं दृष्ट्वा प्रियया साकं ववन्दे नन्दनंदनः ॥
रामाय नम इत्युक्त्वा कृष्णस्तत्राविशत्स्वयम् ॥ १९४ ॥
तं दृष्ट्वा चकिता आसन्देवीदेवगणा अपि ॥
आगंतुकः सपुरुषो वनमालाधरो विभुः ॥ १९५ ॥
मुरलीभूषितो भूत्वा विरेजे रासमण्डले ॥
गोपीमण्डलमध्यस्थो ननर्त्त च तथा पुरा ॥ १९६ ॥
एतच्च चरितं दृष्ट्वा विस्मिता अभवन्सुराः ॥
एतत्ते ब्रह्मराताय पृच्छामि च मुहुर्मुहुः ॥ १९७ ॥
किमेतद्भगवन्नासीत्कृष्णस्य पुरुषस्य च ॥

किमर्थं भगवान्कृष्णः पुरुषं प्रविवेश ह ॥ १९८ ॥
एतन्मे वद योगीन्द्र शुक कारुणिकोत्तम ॥
तदाहं विष्णुराताय प्रावोचं मधुरं वचः ॥ १९९ ॥
इति श्रीशुकसंहितायां प्रथमाध्याये द्वितीयः पादः ॥ २ ॥

अर्थ-राजा बोले, हे भगवन्! आपकी कृपाकरके पूर्वकालविषय मैंने श्रीभागवत सुना और उसीके प्रभावसे नित्य दिव्यलीलाके स्थान सर्वोपरि गोलोकका वास प्राप्त हुआ। हे करुणाके स्वरूप! मैं कृतार्थ होगया आपने कृतार्थ कर दिया हे मुनिसत्तम! यह एक प्रश्न मेरे हृदयमें है कि कभी यह कृष्णचन्द्रजीको वृंदावनमें क्रीडा करतेहुये बड़े कोमल स्निग्ध श्यामलस्वरूपवाले कोई एक पुरुष आये सो स्वरूप माधुर्यवीर्य अवस्था सब गुण करके बराबर याने श्रीकृष्णहीके समान और हाथमें धनुर्बाण धारण किये बायें ओर परम प्रिया करके युक्त उनको देख कर प्रियाके सहित नन्दनन्दन श्रीकृष्णजीने नमस्कार किया 'रामाय नमः' ऐसा कहिके और उसी स्वरूपमें दोनों प्रिया प्रियतम प्रवेश करगये तिनको देख करके सब देवी देवतागण भी चकित होगये सो वह कौन पुरुष समर्थ वनमाला धारण कियेहुये आये मुरली धारण करके रासमण्डलमें प्रकाश करने लगे और जैसे प्रथम गोपियोंके बीचमें श्रीकृष्णचन्द्रजी नृत्य करतेरहे तैसे ही नृत्य करने लगे। यह चरित्र देखकर देवता सब आश्चर्यको प्राप्त होगये सो हे भगवन्! बार २ मैं पूंछता हूं कि यह को हैं? कृष्ण और पुरुष और किस लिये कृष्णभगवान् पुरुषके स्वरूपमें प्रवेश किये॥ सो हे करुणाके स्थान योगीराज श्रीशुकाचार्य स्वामी! यह मेरेको कहिये तब वह परीक्षितजीके बोधके लिये मधुर वचन बोला। यथा-श्रीशुक उवाच ॥

शृणु राजन्निदं तत्त्वं विष्णुरात रहस्यकम् ॥
रामस्य देवदेवस्य परमैश्वर्य्यसूचकम् ॥ २०० ॥
न वै स पुरुषः कश्चिन्न वै स पुरुषोत्तमः ॥
श्रीरामसंज्ञितं धाम परं ब्रह्म सनातनम् ॥ २०१ ॥
कदाचिच्चित्रकूटाद्रौ क्रीडंतं पुरुषोत्तमम् ॥
मृगयाऽभिरतं वीरं रामं प्रोवाच जानकी ॥२०२ ॥

अर्थ-हे राजन्! विष्णुरात यह परम तत्त्व रहस्यको सुनो कैसा है कि श्रीराम देवका परम ऐश्वर्यके सूचित करनेवाला है। न वह निश्चय करके कोई पुरुष ही है

और न वह पुरुषोत्तम ही हैं वह तो श्रीरामधाम (साकेत) वासी परब्रह्म सनातन हैं। कभी चित्रकूटपर्वतमें क्रीडा करतेहुए पुरुषोत्तम भगवान्‌को मृगोंके शिकारमें रत वीरभद्र श्रीरामजीको श्रीजानकीजी बोलीं ॥ श्रीसीतोवाच ॥

अतः परं प्रिय भवान् मृगयातो निवर्त्तताम् ॥
प्रस्वेदकणिकाभिस्ते मुखचन्द्रो विभूषितः ॥ २०३ ॥
सूर्य्योऽपि चान्द्रिमाक्रांतस्तपस्तेपे महातपाः ॥
किंचित्कुंजं समालंव्य स्थीयतामधुना प्रिय ॥ २०४ ॥
इत्युक्तः प्रियया रामो माधुरीकुंजमुत्तमम् ॥
प्राविशच्चित्रकूटाद्रिं कंदरांतरशोभितम् ॥ २०५ ॥
नवमल्लिवनामोदप्रमोदमधुभिर्वृतम् ॥
नवचूतांकुरास्वादमंजुलीलोपकोकिलम् ॥ २०६ ॥
चन्दनानिलसौरभ्यसुवासितदिगंतरम् ॥
लवंगलतिकापाकसमुद्धररजःकणम् ॥ २०७ ॥
सर्वर्तु शोभया जुष्टं विशालसरसान्वितम् ॥
फुल्लकह्लारकमल कदंबैकसुगंधिना ॥ २०८ ॥
तत्र गत्वा दंपती तौ सीतारामौ मनोहरौ ॥
प्रसूनशय्यां मृदुलामध्यासतुरनुत्तमाम् ॥ २०९ ॥
दर्शनस्पर्शनालापप्रियसंगसुनिर्वृतौ ॥
तत्र सुस्थं प्रियं रामं सीता प्रोवाच सस्मितम् ॥ २१० ॥

अर्थ-जानकीजी बोलीं हे प्रिय ! अब आप मृगके शिकारसे निवृत्त होइये काहेसे कि प्रस्वेद (पसीना) के बिंदुओंसे आपका मुखचन्द्र विभूषित होरहाहै, सूर्य्य भी अत्यन्त करके तप रहेहैं इससे हे प्रिय ! इस काल थोरासा कुंजलताके अवलंबमें बैठिये ऐसा कह प्रिया प्रियतम दोनों श्रीसीता रामजी दिव्य माधुरी कुंजमें प्रवेश कर गये जो कि, चित्रकूट (कामद) गिरिके कंदरान्तर शोभित है। कैसा है कि नवीन मल्लिका अशोक वन पुष्पों करके युक्त आनन्द देनेवाले भौंरों करके शोभित है नवीन आम्र फल सुस्वाद वाले और भी अनेक फल फूलादि करके शोभित है भौंरा गुंज रहे हैं कोकिला बोल रहेहैं सुन्दर मलयवासयुक्त शीतल सुगन्ध मन्द वायु वह रहे हैं उससे दशोदिशा सुगंधित होरही हैं और लवंग लतासे १ज

उड रहेहैं। सब ऋतुओंमें शोभासे युक्त है मध्यमें एक विशाल सर (पोखरा) विचित्र मणियोंसे निर्मित शोभित है। जिसमें चारों प्रकारके कमल खिल रहेहैं और चारों ओर कदम्बके सुगंधिसे सुगंधित होरहाहै तहां दोनों श्रीप्रिया प्रियतम श्रीसीता रामजी जाकरके सुन्दर पुष्प शय्यापर जो कि अति सुन्दर कोमल है उसपर दर्शन स्पर्शन आलाप प्रियसंग करके दोनों तहां सावधान होकर बैठे तब प्रिय श्रीरामजीको श्रीजानकीजी हंसकर बोलीं ॥ श्रीसीतोवाच ॥

आवां प्रियनिकुंजेऽत्र सर्वर्तुसुखशोभितम् ॥
कच्चिन्न विहरिष्यावो राधाकृष्णाविव व्रजे ॥ २११ ॥

श्रीराम उवाच ॥

त्वदंशा एव राधा सा प्रिये वृन्दावनेश्वरी ॥
मदंश एव नियतः कृष्णो गोपेन्द्रनंदनः ॥ २१२ ॥
इत्युक्त्वा दर्शयामास तत्र वृंदावनं महत् ॥
यमुनाजलकल्लोलशीतलीकृतमारुतम् ॥ २१३ ॥
नित्यं गोवर्द्धनगिरिच्छायाहरितकाननम् ॥
विस्तीर्णद्वादशवनं रमणीयसुरोचितम् ॥ २१४ ॥
द्वादशोपवनारामो वैकुण्ठालयसौख्यदम् ॥
नंदगोकुलमानन्दं हंसाकलितगोधनम् ॥ २१५ ॥
नृत्तकीमण्डलायुक्तं वत्सवर्द्धितशोभितम् ॥
उदारनंदगृहिणी यशोदाभाग्यभूपितम् ॥ २१६ ॥
कृष्णरासरसोन्मत्तगायद्गोपीकदंबकम् ॥
कृष्णं च राधिकायुक्तं दर्शयामास राघवः ॥ २१७ ॥
श्रीमद्युगलनाट्येन नटंतं प्रेयसीयुतम् ॥
दर्शयित्वा प्रियां प्राह रामस्त्रैलोक्यसुंदरः ॥ २१८ ॥

अर्थ-हे प्रिय! सर्व ऋतु करके शोभित यहां माधुरी कुंजमें आप हम दोनों कभी नहीं राधाकृष्णसे विहार किया इससे दोनों विहार करें तब रामजी बोले कि हे प्रिये! तुम्हाराही अंश वह वृन्दावनेश्वरी राधाजी हैं और मेरे ही अंश गोपेन्द्रनन्दनन्दन श्रीकृष्णजी हैं ऐसा कहकर तहां महान् वृन्दावन देखाते भये जहां यमुनाजल कल्लोलते हैं और शीतल सुगन्ध मन्द वायु बहतेहैं। नित्य गोवर्धन पर्वत

है जिसकी छायामें हरित वन है वह सुन्दर देवताओं करके भावित विस्तार द्वादश वन करके युक्त है और द्वादश उपवन हैं ॥ वह वैकुण्ठस्थानके तुल्य सुखप्रद है। नन्दजीके गोकुल हंसके तुल्य गोधन करके युक्त है; भिन्न २ नृत्यस्थान हैं सो नृत्यकरनेवाले मंडल करके युक्त है। जहां छोटे २ बछडों करके परिपूरित शोभित है, और बडी उदार नन्दस्त्री श्रीयशोदाजी भाग्य करके भूषित हैं और श्रीकृष्ण रासरसकाके उन्मत्त गान करते हुए सब गोपीको और राधिकाजीके सहित श्रीकृष्णचन्द्रजीको श्रीराघवजी देखाते भये। श्रीमान् युगल स्वरूपके नृत्य करते हुये प्रेम युक्त देखा करके प्रिया श्रीसीताजीसे त्रिलोक सुन्दर श्रीरामजी बोले। यथा–श्रीराम उवाच ॥

प्रिये तव ममासौ च द्वाविमौ सह दंपती ॥
माधुर्य्यलीलाकलिकाललितौ विश्ववल्लभौ ॥ २१९ ॥
ततस्तद्युगलं श्रीमद्राधाकृष्णात्मकं महत् ॥
सीतारामात्मकं युग्मं प्राविशन्नतिपूर्वकम् ॥ २२० ॥
ततः प्रवृत्ते रामश्च सीतारामप्रधानकः ॥
गोपीजनकरोद्भूतमृदंगाऽऽनककाहलः ॥ १२१ ॥
मिथः सहचरीवृन्दकरतालविराजितः ॥
झर्झरः शंखभेर्य्यादिवादित्रविततध्वनिः ॥ २२२ ॥
युगलाऽनुनयानंदी युगलो वयदीपितः ॥
मिथो युगलनाटचैक्यतुष्टाऽखिलसखीजनाः ॥ २२३ ॥
श्रीराममुरलीनादवर्द्धितानि सकौतुकः ॥
सीता कलस्वरालापमुह्यत्सहचरीगणः ॥ २२४ ॥
कामोत्साहप्रदालापचुंबनालिंगनादिभिः ॥
नर्मस्पर्शैर्नर्महासैर्भावैश्च बहुरूपकैः ॥ २२५ ॥
अनेकैर्मधुरालापैर्भूषितश्च महोत्सवः ॥
शश्वद्युगलनाटचेन सीतारामौ विरेजतुः ॥
कदाचिद्गोपिकातुल्यसख्या केनात्मना विभुः ॥ २२६ ॥

अर्थ–श्रीरामजी बोले, हे प्रिये! आपका और मेरा स्वरूप यह दोनों प्रिया प्रियतम श्रीराधाकृष्ण कैसे हैं कि माधुर्य्य लीलाकरके युक्त और संपूर्ण

संसारको दोनों प्रिय हैं ऐसा कहा तिसके पीछे राधाकृष्णात्मक दोनों महान् स्वरूप श्रीसीतारामस्वरूपमें नमस्कारपूर्वक लीन होगये। भाव-राधाजी श्रीसीताजीमें लीन होगई और श्रीकृष्णजी श्रीरामजीमें लीन होगये। तब केवल प्रधान श्रीसीतारामजी रहगये सोई वृंदावनमें रासलीला करनेलगे उस समय गोपियोंके हाथमें बडे अद्भुत मृदंगादि वाजा बजनेलगे सखियोंकी वृंद एकसे एक मिलीहुई और करताल करके शोभित किसीके हाथमें झर्झर (झांझ) है किसीके हाथमें शंख है किसीके हाथमें भेरी (भेंड) बाजा है कोईके हाथमें वीन है कोईके हाथमें मुरचंग है यानें सब वाजा लिये हैं सो विस्तार शब्द होनेलगा उस समयमें सब युगलस्वरूपके अनुकूल कार्य करनेलगीं और श्रीसीतारामजी भी दोनों किशोर अवस्थाकरके प्रकाशित होगये और दोनों परस्परमिल हाव भाव युक्त ऐसा विचित्र नृत्य किया कि उस नृत्यादि करके सब सखीजन संतुष्ट होगई श्रीरामजीने मुरलीनादसे और नानाप्रकारके कौतुकसे सबको आनंद करादिया तैसी ही, श्रीजानकीजीके सुंदरस्वर आलापसे सब सहचरीगण मोहिगई वह चुंबन आलिंगनादि सब कामके बढाने वाले हैं। नर्म (कोमल) स्पर्शसे कोमल हाससे कोमल भावसे अनेक विधि अलापसे श्रीसीतारामजीने रासमण्डलको आनंदसे भूषित करादिया निरंतर युगलस्वरूप श्रीसीतारामजीके नृत्यकरके प्रकाशित होगये कभी गोपिकासमान होजाते हैं, कभी सखीके रूप होजातेहैं, कभी गुप्त होजातेहैं कभी प्रगट होजातेहैं इस प्रकारके त्रिलोकसुंदर श्रीरामजीको रासमें देवतालोग देखते भये।

रासे नृत्यन्सुरैर्दृष्टो रामस्त्रैलोक्यसुन्दरः ॥
कदाचिद्गोपिकायुग्ममध्यवर्त्तीकिशोरकः ॥ २२७ ॥
रासे नृत्यन्बभौ रामो नीलमेघमनोहरः ॥
रत्नप्रतप्तसौवर्णकिरीटशिखिपिच्छकः ॥ २२८ ॥
गुंजाहारधरः श्रीमान्प्रोल्लसज्जघनाम्बरः ॥
नृत्यतालकरोद्भावमणिरत्नांगुलीयकः ॥ २२९ ॥
मुरलीनादमधुरः कोटिकंदर्पसुन्दरः ॥
एवं नंदात्मजः कृष्णस्त्वावतारसमापनम् ॥ २३० ॥
रामं प्रविशति श्यामं सच्चिदानंदविग्रहम् ॥
सोऽद्यापि क्रीडति गिरौ चित्रकूटे मनोहरे ॥ २३१ ॥
नित्यं वृन्दावने एव माधुरीकुंजमध्यगे ॥

आगामिनि द्वापरांते कंसादिभिरुपद्रुते ॥ २३२ ॥
लोके धर्मस्य रक्षार्थं वसुदेवस्य वेश्मनि ॥
प्रादुर्भूय व्रजेन्द्रस्य गोकुले विहरिष्यति ॥ २३३ ॥
एवं कृष्णोऽविशद्रामे पूर्णे स्वानन्दविग्रहे ॥
दृष्टो रामः परं तत्त्वं यत्र चापि न गोचरः ॥ २३४ ॥
इति श्रीशुकसंहितायां प्रथमाध्याये तृतीयपादः ॥ ३ ॥

अर्थ–कभी दो गोपीके मध्यमें नित्य किशोर हो जातेहैं ऐसे रासमण्डलमें नृत्य करतेहुये नीलमेघके समान मनोहर होगये और रत्नजडित मतप्तसुवर्णके शिरपर किरीट मोरपंख (मोरमुकुट) करके शोभित गलेमें गुंजाके हार (माला) धारण कियेहैं श्रीमान् कांतियुक्त तडितसे पीताम्बर शोभित है नृत्यमें भावयुक्त ऊर्ध्वहाथ अरुण है तिसमें मणिरत्ननिर्मित मुद्रिका (अंगूठी) शोभित है और मुरलीकी नाद बहुत मधुर है कोटि कामसे सुंदर हैं ऐसा नंदात्मज श्रीकृष्णजी स्वयं अपने अवतारके कारण श्रीरामजीके श्यामसच्चिदानंदके स्वरूपमें प्रवेश करतेहैं वही आज भी सुंदर चित्रकूट पर्वतमें क्रीडा करतेहैं जो कि वृंदावन नित्य है उसी ही वृंदावन माधुरी कुंजके मध्यमें विहार करतेहैं वही कृष्ण आगे द्वापरान्तमें कंसादिके उपद्रवसे लोकमें धर्मरक्षार्थ वसुदेवके घरमें उत्पन्न होकर व्रजेन्द्र नंदजीके गोकुलमें विहार करेंगे ॥ ऐसा श्रीकृष्णजी अपने पूर्णानन्दस्वरूप श्रीरामजीमें प्रवेश करतेहैं सो रामजीके परतत्त्व आपने अगोचर गोलोकमें देखा जहां भी विषयसे रहितहैं फिर भी श्रीशुकाचार्यस्वामी बोले। यथा–

तत्र रासे प्रादुरासीद्ब्रह्माणी ब्रह्मकोटयः ॥
वैष्णवी विष्णुकोटयश्च रुद्राणी रुद्रकोटयः ॥ २३५ ॥
सर्वाश्च देवतास्तत्र गोपिकाभावभाविताः ॥
रासमण्डलमध्यस्था ननृतुः स्वामिना सह ॥ २३६ ॥
तथा षष्टिसहस्राणि दण्डकारण्ययोगिनाम् ॥
गोपीभावं समासाद्य रेजुः श्रीरासमण्डले ॥ २३७ ॥
श्रुतयश्चैव कालश्च रासमण्डलमध्यगाः ॥
गोपीरूपधरा रेजुर्महासौभाग्यभूषिताः ॥ २३८ ॥
कालश्च तत्र नियतं पूर्णिमाशारदी हि सा ॥

वातश्च तत्र सततं सुरभिश्चंदनद्रुमैः ॥ २३९ ॥
भूमिश्च रत्नमाणिक्यप्रततकनकोऽज्वला ॥
जलं यमस्वसा साक्षात्पीयूषाधिकसुंदरम् ॥ २४० ॥
उज्ज्वलांशुचयो यत्र मध्यरात्रगतः शशी ॥
राकापि या प्रभोर्लीला सा नित्यैव न संशयः ॥ २४१ ॥
सीता च सुंदरी यत्र सर्वलीलाधिदेवता ॥
चित्रकूटाद्रिके रम्ये यद्वृंदावनमद्भुतम् ॥ २४२ ॥
गोलोकोऽयं स एवात्र दृश्यते पुरतस्तव ॥
सीताऽऽभिलापसंभूत्यै श्रीरामेण विनिर्मितः ॥ २४३ ॥

अर्थ-जहां रामजीके रासमें कोटि ब्रह्मा कोटि ब्रह्माणी कोटि लक्ष्मी कोटि विष्णु और कोटि शिव कोटि पार्वती उत्पन्न हुये। तहां सब देवता लोग गोपिका भावको प्राप्त होगये और अपनी स्वामिनीके सहित रासमण्डलमें नृत्य करनेलगे तैसे ही ६० हजार दण्डक वनवासी सब ऋषि लोग भी गोपिका भावको प्राप्त होकर श्रीरासमण्डलमें प्रकाश करने लगे और श्रुति सब तथा काल ये सब भी रासमण्डलमें गोपीरूप धरके महासौभाग्यसे भूषित होकर प्रकाश करनेलगे और काल. तहां नेमपूर्वक ६ मासकी सरदपूर्णिमाकी रात्रि होगई और वायु तहां सर्वदा मलयवास युक्त बहनेलगा पृथिवी सर्वत्र माणिक्यरत्न मय तप्त कनकसे होगई जल सर्वदा साक्षात् अमृतसे भी अधिक सुन्दर होगया और जहां मध्य रात्रिकी प्राप्ति होनेसे उज्ज्वल पवित्र चन्द्रमा होगया तथा पूर्णि-माकी रात्रि भी महाराजके रासलीला करके प्रभायुक्त होगई और जहां श्रीजानकीजी सुन्दरी सब लीलाकी अधि देवता हैं वह सुन्दर वृन्दावन चित्रकूट पर्वतमें है जो आश्चर्य मय है वही यह गोलोक सर्वोपरि इहां आपके आगे देख परता है सो श्रीसीताजीके अभिलापसे श्रीरामजीने निर्माण कियाहै यह सुनकर राजा बोले। यथा-विष्णुरात उवाच ॥

कथं सीताऽभिलापेण गोलोकं निर्ममे प्रभुः ॥
एतन्मम समाचक्ष्व मुनीन्द्र परिपृच्छतः ॥ २४४ ॥

श्रीशुक उवाच ॥

कल्पादौ भगवान् रामः स्वेऽच्छामात्रेणचोदितः
त्रैलोक्यं कृतवाञ्छांगादाविर्भावं प्रदर्शयन् ॥ २४५ ॥

अमोघमुत्तवान्बीजमंशुं सप्तार्णवेषु सः ॥
हिरण्यगर्भसंकाशः सूर्य्यकोटिसमप्रभः ॥ २४६ ॥
ततश्चराचरस्यादौ तत्त्वसृष्टिं विनिर्ममे ॥
तेषु चैतन्यमाधाय ब्रह्माण्डं संजघाट सः ॥ २४७ ॥
उच्चावचानि भूतानि रचयामास विश्वकृत ॥
महीं रचितवान्देवः सप्तसागरसंभृताम् ॥ २४८ ॥
पर्वतान् विविधान्रम्यान्देवगंधर्वभोगवान् ॥
सरांसि रम्यरूपाणि राजहंसाश्रयाणि च ॥ २४९ ॥
उत्फुल्लकमलामोदवारीणि रुचिराणि च ॥
मेरुं रचितवांस्तत्र स्थानानि त्रिदिवौकसाम् ॥२५० ॥
एवं कृत्वा जगत्सर्वं सदेवासुरमानुपम् ॥
देवानामसुराणां च मनुष्याणां च सौख्यदम् ॥ २५१ ॥
वासं प्रकल्पयामास गृहारामादिशोभितम् ॥
ततः सीता स्वयं प्राह रामं कमललोचनम् ॥ २५२ ॥

अर्थ-राजा परिक्षित बोले, हे मुनीन्द्र ! श्रीजानकीजीके अभिलाप करके प्रभु श्रीरामजी गोलोक कैसे निर्माण किये यह कहिये देखके पूछते हैं। श्री शुकाचार्य स्वामी बोले कि कल्पके आदिमें भगवान् श्रीरामजीने अपनी इच्छाकी प्रेरणा मात्रसे तीनोंलोक अपने शरीरसे उत्पन्न किये तहां प्रथम अमोघ वैष्णवी वीर्य तेज-युक्त इच्छासे जल प्रगट कर उसमें छोड़ दिया, वह वैष्णवी वीर्य इच्छा करके कोटि सूर्यसे प्रकाशवाला सुवर्णसे कांतिवाला एक गोलाकार अंड होगया उस अण्डमेंसे सर्वलोकोंके रचनेवाले हिरण्यगर्भ भगवान् ब्रह्मा रूपसे प्रगट हुये उसीसे सब चराचर पैदा हुए उसीमें चैतन्य स्थापन कर कोटि २ ब्रह्मांड रचन किया तथा ऊंच नीच योनि सब जीवोंको ब्रह्माजी रचते भये और सात सागरकरके युक्त पृथिवीको रचा तथा देव गंधर्वके भोगवान् सुंदर नाना प्रकारके पर्वत रचे। सुंदर रमणीय राजहंसों करके युक्त सरोवर रचे जिनमें दिव्य जल भरा है और नाना प्रकारके कमल आनंददायक खिलेहैं। सुमेरुपर्वत लक्षयोजन वाले रचे त.। इन्द्रादि ३३ कोटि देवताओंके भिन्न २ स्थानोंको रचा ऐसे सब देवता असुर मनु-

ण्योंके सहित संपूर्ण संसारको रचकर तिसपर सब देवता सब असुर मनुष्योंके सुखदेने वाले घर बाग सुंदर रचे तब कमललोचन श्रीरामजीसे स्वयं श्रीजानकीजी बोलीं। यथा-श्रीसीतोवाच ॥

इच्छामात्रेण ते कांत सरत्नं भुवनत्रयम् ॥
अतीव सुंदरं भाति प्रासाद इव भूयते ॥ २५३ ॥
स्वर्गमृत्युतलांतस्थः सततं सुखमासने ॥
स्वेषु स्वेषु निवासेषु गृहारामादिमत्सु च ॥ २५४ ॥
पुरातनमिदं स्थानमस्माकं तु तदेव हि ॥
कोशलाख्यं पुरं दिव्यं प्रलयेऽप्यविनश्वरम् ॥ २५५ ॥
इदं त्रैलोक्यमखिलं प्रलयेऽनंक्ष्यति प्रभो ॥
अविनश्वरमेनैकमयोध्यापुरमद्भुतम् ॥ २५६ ॥
तत्रैव रमसे नाथ ह्यानन्दरसनिर्वृतः ॥
नवीनं न कृतं स्थानं स्वभोगाय कथं प्रभो ॥ २५७ ॥
स्वतंत्रेच्छोऽसि भगवंस्तथापि च निबोध मे ॥
मदुत्कण्ठावशेनैव कुरु स्थानं मनोरमम् ॥ २५८ ॥
अयोध्यायाः प्रतिकृतिर्यत्र सर्वं विलोक्यते ॥
राजानः कुर्वते नव्यं पुरस्थानेषु सत्स्वपि ॥ २५९ ॥
एवमभ्युदितो रामः प्रियया साभिलापया ॥
सर्वेषां चैव लोकानामुपरि स्थानमद्भुतम् ॥ २६० ॥
गोलोकं कल्पयामास प्रादुर्भाव्य स्वलोकतः ॥
अयोध्यायाः प्रतिकृतिर्यत्र सर्वापि दृश्यते ॥ २६१ ॥

अर्थ-श्रीजानकीजी बोलीं कि हे स्वामी जी ! आप अपनी इच्छामात्रसे सर्व रत्नोंसे युक्त तीनों लोकोंको अत्यंत सुंदर मकाशमय प्रासाद (महल) के समान स्वर्ग अर्थात् भूर्लोक, भुवः लोक, स्वर्लोक, महर्लोक, जनलोक, तपलोक, सत्यलोक तथा अतल, वितल, सुतल, तलातल, रसातल, महातल, पाताल पर्यंत सुखासन-पूर्वक अपने२ निवासस्थानमें घर बाग तलावादि रचा परन्तु यह मेरा स्थान तो सदैव पुरातन (पुराना) है जो कि कोशल (अयोध्या) साकेत नामसे विख्यात

21512

है जिसका प्रलयमें भी नाश नहीं है । यह तीनोंलोक प्रलयमें नाश होजातेहैं केवल एक आश्चर्यमय अयोध्या ही पुरी अविनाशी है हे नाथ ! तँही पुराने स्थानमें विहार करते हैं परन्तु अपने भोग विलासके लिये हे प्रभो ! नवीन स्थान क्यों न किया ? हे भगवन् ! यद्यपि आप स्वतंत्र हैं तथापि मैं निवेदन करतीहूं कि मेरे प्रेम करके कोई सुन्दर नवीन स्थान करो । जहां श्रीअयोध्याजीके प्रतिबिंब सब वैभव विलास देखपरें काहस कि राजालोग भी नवीन पुर स्थापन करते हैं। अपने सुखके लिये वैसेही आपभी करिये ऐसा कहेसे श्रीरामजी श्रीसीताजीके अभिलाषसे सब लोकोंके ऊपर विचित्र स्थान गोलोक अपने लोक साकेतके अंशसे कल्पित करतेभये जहां सब वैभव श्रीअयोध्याजीके प्रतिबिम्ब देखपरतेहैं ।

यमुनायाः परिणता सरयू सरसा सरित् ॥
अभूद्गोवर्द्धनत्वेन दिवि रत्नमयो गिरिः ॥ २६२ ॥
प्रमोदवनमत्रासीद्दिव्यं वृन्दावनं वनम् ॥
पारिजाततरुर्जातो वंशीवटतरुर्हि सः ॥ २६३ ॥
ते च रासविलासाद्याः प्रादुरासुः समंततः ॥
आभीरोऽसुखिनो नाम रामधात्रीपतिः पुरा ॥ २६४ ॥
स एव समभून्नंदो मांगल्या च यशोदिका ॥
त एव गोपीगोपाद्या लीलापरिकराश्च ते ॥ २६५ ॥
सैव श्रीजानकी देवी वृषभानुसुताऽभवत् ॥
अशोकवनगा तत्र ह्यत्र वृंदावनेश्वरी ॥ २६६ ॥
तया सह बभौ रामो वंशीवादनकौतुकी ॥
नित्यरासविलासादिकुर्वाणः सुमनोहरम् ॥ २६७ ॥
गोलोकमखिलं वीक्ष्य लीलापरिकरान्वितम् ॥
सद्यः प्रसन्नहृदया प्रोवाच निजवल्लभम् ॥ २६८ ॥

श्रीप्रियोवाच ॥

दृष्ट्वेदमद्भुतं स्थानं संपूर्णा मे मनोरथाः ॥
अयोध्यायाः प्रतिकृतिः कच्चित्तावत्ततोधिकाम् ॥ २६९ ॥

आवां यत्रैव रंस्यावः सुचिरं कामकेलिभिः ॥
अतीव सुंदरे स्थाने सच्चिदानंदमंदिरे ॥ २७० ॥
एवमुक्तस्तया सार्द्धं रेमे वृन्दावने प्रभुः ॥
यथा गायंति मुनयो महाभावविभूपिताः ॥ २७१ ॥

इति श्रीशुकसंहितायां प्रथमाध्याये चतुर्थपादः ॥ ४ ॥

अर्थ-श्रीयमुनाजी जो वृन्दावनमें हैं सोई गोलोकमें विरजा नामसे प्रसिद्ध हैं सो सरयूजीसे हुई और गोवर्द्धन गिरि दिवि (क्रीडा) रत्नगिरि (मणिपर्वत) से हुआ और प्रमोद वनसे दिव्य वृन्दावन हुआ कल्प वृक्षसे वंशी वट हुआ और इस रास विलाससे जो उत्पन्न हुए आभीर (गोप) दुःखित नामवाले पूर्व धात्री पति रहे वही नन्दजी हुए और मांगल्या यशोदा हुई तथा पूर्व लीलाके जे परिकर रहे ते सब गोपी गोपादिक हुए । जानकीजी राधिकाजी हुई और अशोकवनमें जो देवी रहीं वही वृन्दावनेश्वरी (वृन्दादेवी) हुई, सो उनके सहित रामजी राधाकृष्ण हो वंशीनादमें निपुण बडे कौतुकी नित्य रास विलासादि लीला सुंदर करते भये। सम्पूर्ण गोलोक लीला परिकरसे युक्तसे देखके शीघ्र प्रसन्न हृदयसे श्रीप्राणप्यारेसे श्रीजानकीजी बोलीं कि इस अद्भुत स्थानको देखकर मेरा मनोरथ सब प्रकारसे पूर्ण होगया इहां अयोध्याजीका विभव थोरा है नवीन रचना विशेष है इससे उससे भी अधिक है इस लिए आपहम दोनों अत्यन्तसुन्दर स्थान सच्चिदानंद रूप मन्दिरमें बहुत दिन पर्यत यहांपर कामकेलि (विहार) करेगें ऐसा कहिकर प्रिया सहित वृन्दावनमें विहार करने लगे जैसा मुनि लोग महाभावसे भूपित करके रहस्य लीला गातेहैं । हे शिष्य ! ऐसा भी श्रीशुकदेवसंहितामें वर्णन है इससे श्रीरामजीसे परे ब्रह्म दूसरा कोई नहीं हैं बांकी पक्षपात करना वृथा मिथ्या झूटना है जो कोई श्रीसीतारामजीको छोडकर दूसरेको ब्रह्म प्रतिपादन करतेहैं वह मूर्ख परतत्त्वसे विमुख हैं विशेष क्या कहें हे शिष्य ! सदाशिव संहिताके प्रथमाध्यायमें लिखा है कि साकेत लोकमें चार द्वार हैं तिसमें पश्चिम द्वारपर वृन्दावन है जहां विभीषणजी द्वारपाल हैं यथा-

पश्चिमां पाति धर्मात्मा राक्षसेन्द्रो हरिप्रियः ॥
पूर्वमावृत्य विश्वात्मा सुग्रीवस्तेजसात्मकः ॥ २७२ ॥
उत्तरं रक्षति वीरो वालिपुत्रो मम प्रियः ॥

दक्षिणं तु सदा पाति हनूमान्नामवत्सलः ॥ २७३ ॥
सर्वसत्त्वगुणोपेतः सर्वसत्त्वनिकेतनः ॥
महाशंभुः स्वयं सोऽपि कपिरूपो दुरासदः ॥ २७४ ॥
मत्स्यकूर्मवराहाश्च नृसिंहहरिवामनौ ॥
भार्गवो हलिकंसारिबुद्धकल्किभिरुच्यते ॥ २७५ ॥
उपास्यमानं देवेशं देवानां प्रवरं विभुम् ॥
साकेतपश्चिमद्वाराद्वृंदावनमदूरतः ॥ २७६ ॥
गोगणैरावृतः श्रीमान्क्वणद्वेणुविनोदकृत् ॥
सर्वरासरसोत्पन्नो गोपकन्यासमावृतः ॥ २७७ ॥
गोवर्द्धनगिरिस्तत्र यत्र देवः प्रतिष्ठितः ॥

(पुनः द्वितीयाध्यायेऽपि)

अवतारैरसंख्यातैः प्रधानैर्दशभिस्तथा ॥ २७८ ॥
वेदैः सांगोपनिषदैर्यज्ञैर्बहुविधैरपि ॥
सेव्यमाने परे रम्ये गुणावासे परं पदे ॥ २७९ ॥

अर्थ–पश्चिम ओर धर्मात्मा राक्षसेंद्र विभीषणजी रक्षा करते हैं पूर्वको विश्वरूप तैजसात्मक श्रीसुग्रीवजी रक्षा करतेहैं और उत्तर वालिपुत्र मेरा प्रिय वीरशिरोमणि अंगदजी रक्षा करतेहैं और दक्षिण द्वारकी रक्षा सर्वदा रामप्रिय महावीर श्रीहनूमानूजी करते हैं जो सब गुण करके युक्त हैं सर्व सत्त्वके स्थान हैं वह महाशंभुजीभी स्वयं दुस्तर वानर रूप होकर श्रीरामसेवा करतेहैं और भी मत्स्य,कूर्म, वाराह और नरसिंह, हरि भगवान् वामन, परशुराम, बलदेव, कृष्ण, बुद्ध, कलंकी इन सब करके देवताओंमें श्रेष्ठ समर्थ करके स्वामी श्रीरामजी सेवित हैं । साकेतके पश्चिमद्वारके समीप ही वृन्दावन है जहां गोगण सर्वत्र पूर्ण है और श्रीमान् वेणु (वंशी)नादसे पूरित है । सर्वरासरसमें उन्मत्त गोपकन्या करके युक्त है तहां गोवर्द्धनगिरि है जहां गोवर्द्धननाथ देव प्रतिष्ठित हैं दूसरे अध्यायमें कहा है कि असंख्य अवतारहैं तिनमें दश अवतार प्रधान हैं तिन सब करके और उपनिषदोंके सहित चारों वेद करके तथा बहुप्रकारके यज्ञोंकरके परात्पर ब्रह्म श्रीरामजी सेवित हैं । ऐसे सर्वोपरि श्रीरामजी हैं कि जिनके सर्वावतार सेवा करते हैं और विशेष क्या कहना है । हे शिष्य ! पद्मपुराणके उत्तरखण्डमें २२८ अध्यायमें लिखा है कि सबसे परे लोक

वैकुंठ है जहां कृष्णरूपसे परमात्मा रहते हैं वही परम धाम है गोगण और गोपगण करके युक्त है वही विष्णुजीके परम पद है जहां हजारों रत्नमय मंदिर विमानादिक शोभित हैं उसी वैकुंठके मध्यमें परम दिव्य श्रीअयोध्यानगरी है जिस वैकुंठके दशौ दिशामें वासुदेवादिक लोक हैं वह वैकुंठ सप्तावरण करके युक्त है और वसिष्ठसंहिताके २६ अध्यायमें लिखा है कि सर्वोपरि वैकुंठ है वैकुंठसे भी परे गोलोक है गोलोकके मध्यमें साकेतलोक है साकेतके पूर्व और श्रीमती मिथिलापुरी (जनकपुर) है दक्षिण चित्रकूट है पश्चिमवृंदावन है जहां कृष्णजी विहार करते हैं उत्तर महावैकुण्ठ है जहां सब पार्षदोंके सहित श्रीमन्नारायण रहतेहैं एही नारायण सृष्टिकर्ता २४ अवतारोंके कारण हैं एही नारायण रामचरित्रके मुख्याचार्य हैं और साकेतलोक सप्तावरण करके युक्त है जहां सब अवतारोंके भिन्न २ स्थान हैं सो विस्तारसे देखलो ॥

इति श्रीमदयोध्यावासिवैष्णवश्रीसरयूदासविरचितपरमः तत्त्वोपासनात्रय-सिद्धांतः समाप्तः ॥ पद्मोत्तरखण्डे २२८ अध्याये-

---

अत्राहतत्परं धाम गोपवेपस्य शार्ङ्गिणः ॥
तद्भाति परमं धाम गोभिर्गोपैस्सुखाह्वयैः ॥ २८० ॥
तद्विष्णोः परमं धाम यांति ब्रह्मसुखप्रदम् ॥
नानाजनपदाकीर्णं वैकुण्ठं तद्धरेः पदम् ॥ २८१ ॥
प्राकारैश्च विमानैश्च सौधै रत्नमयैर्वृतम् ॥
तन्मध्ये नगरी दिव्या साऽयोध्येति प्रकीर्तिता ॥ २८२ ॥
मत्स्यः कूर्मो वराहश्च नारसिंहोऽथ वामनः ॥
रामो रामश्च कृष्णश्च बुद्धः कल्की च ते दश ॥ २८३ ॥
एते तु विभवावस्था ब्रह्मणः परमात्मनः ॥
नृसिंहरामकृष्णेषु षाड्गुण्यं परिपूरितम् ॥ २८४ ॥
परावस्था तु देवस्य दीपादुत्पन्नदीपवत् ॥
प्राच्यां वैकुण्ठलोकस्य वासुदेवस्य मंदिरम् ॥ २८५ ॥
लक्ष्म्या लोकस्तथाग्नेय्यां याम्यां संकर्षणालयः ॥
सारस्वतस्तु नैर्ऋत्यां प्राद्युम्नः पश्चिमे तथा ॥ २८६ ॥

रतिलोकस्तु वायव्यामुदीच्यामनिरुद्धभूः ॥
ऐशान्यां शांतिलोकः स्यात्प्रथमावरणं स्मृतम् ॥ २८७ ॥
केशवादिचतुर्विंशत्यमी लोकास्ततः क्रमात् ॥
द्वितीयावरणं प्रोक्तं वैकुण्ठस्य शुभाह्वयम् ॥ २८८ ॥
ऋग्यजुःसामाथर्वाणो लोका दिक्षु महत्सु च ॥
मत्स्यकूर्मादिलोकास्तु तृतीयावरणं शुभम् ॥ २८९ ॥
सत्याच्युतानंतदुर्गाविष्वक्सेनगजाननाः ॥
शंखपद्मनिधीलोकाश्चतुर्थावरणं शुभम् ॥ २९० ॥
साविन्या विहगेशस्य धर्मस्य च मखस्य च ॥
पचमावरणं प्रोक्तमक्षयं सर्ववाङ्मयम् ॥ २९१ ॥
शंखचक्रगदापद्मखड्गशार्ङ्गहलं तथा ॥
मौशलं च तथा लोकाः सर्वशस्त्रास्त्रसंयुताः ॥ २९२ ॥
षष्ठमावरणं प्रोक्तं मन्त्रास्त्रमयमक्षरम् ॥
ऐन्द्रपावकयाम्यानि नैर्ऋतं वारुणं तथा ॥ २९३ ॥
वायव्य सौम्यमैशानं सप्तमं मुनिभिः स्मृतम् ॥
साध्या मारुद्गणाश्चैव विश्वेदेवास्तथैव च ॥ २९४ ॥
नित्याः सर्वे परे धाम्नि ये चान्ये च दिवौकसः ॥
न तद्भासयते सूर्यो न शशांको न पावकः ॥ २९५ ॥
यद्गत्वा न निवर्त्तंते योगिनः संशितव्रताः ॥

इति।

पुनः वशिष्ठसंहितायां भरद्वाज उवाच ॥

वेदा वेदांतसारज्ञ विरंचिप्रभवोत्तम ॥
भवता यत्परिज्ञातं तन्न जानंति केचन ॥ १ ॥
अतस्त्वां परिपृच्छामि हरेर्धाम्नां हि कारणम् ॥
किं च तत्परमं धाम माधुर्य्यैश्वर्य्यभूषणम् ॥ २ ॥

यत्र सर्वावताराणामादिकारणविग्रहः ॥
क्रीडते कृपया मे त्वं तत्त्वतः कथय प्रभो ॥ ३ ॥

वशिष्ठ उवाच ॥

साधु पृष्टं त्वया तात गुह्याद्गुह्योत्तमं महत् ॥
सारात्सारतमं वेदसिद्धांतं प्रवदामि ते ॥ ४ ॥
श्रूयतां सावधानेन रहस्यमतिदुर्लभम् ॥
रामभक्तं विना क्वापि न वक्तव्यं त्वयाऽनघ ॥ ५ ॥
सर्वेभ्यश्चापि लोकेभ्यश्चोर्ध्वं प्रकृतिमण्डलात् ॥
विरजायाः परे पारे वैकुण्ठं यत्परं पदम् ॥ ६ ॥
तस्मादुपरि गोलोक सच्चिदिंद्रियगोचरम् ॥
तन्मध्ये रामधामास्ति साकेतं यत्परात्परम् ॥ ७ ॥
श्रीमद्वृंदावनादीनि तद्धामावरणेष्वपि ॥
सर्वेषामवताराणां संति धामान्यनेकशः ॥ ८ ॥
केवलैश्वर्यमुख्यानि धामान्येतानि सन्मते ॥
ऐश्वर्योपासका भक्ता ध्यायंति प्राप्नुवंति च ॥ ९ ॥
एभ्यः परतमं धाम श्रीरामस्य सनातनम् ॥
पृथिव्यां भारते वर्षे ह्ययोध्याऽख्यं सुदुर्लभम् ॥ १० ॥
अखंडसच्चिदानंदसंदोहं परमाद्भुतम् ॥
वाङ्मनोगोचरातीतं त्रिषु कालेषु निश्चलम् ॥ ११ ॥
भूतलेऽपि च यद्धाम तथापि प्रकृतेर्गुणाः ॥
संस्पृशंति न तज्जातु जलानि कमलं यथा ॥ १२ ॥
कालः कर्म स्वभावश्च मायिकः प्रलयस्तथा ॥
ऊर्मयः षड्विकाराश्च न यत्र प्रभवंति हि ॥ १३ ॥
यदंशेन प्रकाशेते विभूती द्वे सनातने ॥
अधश्चोर्ध्वमनंते च नित्ये च परमाद्भुते ॥ १४ ॥
विभाति सरयूर्यत्र पश्चिमादि त्रिदिक्षु च ॥
विरजाद्याः सरिच्छ्रेष्ठाः प्रकाशंते यदंशतः ॥ १५ ॥

परान्नारायणाच्चैव कृष्णात्परतरादपि ॥
यो वै परतमः श्रीमान् रामो दाशरथिः स्वराट् ॥ १६ ॥
यस्यानंतावताराश्च कला अंशविभूतयः ॥
आवेशा विष्णुब्रह्मेशाः परं ब्रह्मस्वरूपभाः ॥ १७ ॥
स एव सच्चिदानन्दो विभूतिद्वयनायकः ॥
वात्सल्याद्यद्भुतानंतकल्याणगुणवारिधिः ॥ १८ ॥
राजेन्द्रमुकुटप्रोद्यद्रत्ननीराजितांघ्रिणा ॥
पित्रा दशरथेनैव वात्सल्यामृतसिंधुना ॥ १९ ॥
कौशल्याप्रमुखाभिश्च मातृभिर्भ्रातृभिस्त्रिभिः ।.
सीतादिभिःस्वदारैश्च दासीभिश्चालिभिस्तथा ॥ २० ॥.
सखिभिः समरूपैश्च दासैश्चामितविक्रमैः ॥
वशिष्ठाद्यैर्मुनीन्द्रैश्च सुमंत्राद्यैश्च मंत्रिभिः ॥ २१ ॥
परिवारैरनेकैश्च सच्चिदानंदमूर्तिभिः ॥
भोगैश्च विविधैर्दिव्यैर्भोगोपकरणैस्तथा ॥ २२ ॥
सार्द्धं वसति यत्रैव स्वतंत्रः क्रीडते सदा ॥
क्षणं हित्वा न तद्धाम क्वचिद्याति स्वयं प्रभुः ॥ २३ ॥
तन्माधुर्य्यमयं नित्यमैश्वर्य्यान्तर्गतं ध्रुवम् ॥
रामस्यातिप्रियं धाम नास्त्यनेन समं क्वचित् ॥ २४ ॥
अतोऽयोध्यां रसज्ञा ये सर्वदा पर्य्युपासते ॥
प्राकृतैश्चक्षुभिर्नैव दृश्यते सा कथंचन ॥ २५ ॥
देहत्रयविनिर्मुक्ता रामभक्तिप्रभावतः ॥
तुरीयसच्चिदानंदरूपाः पश्यंति तां पुरीम् ॥ २६ ॥
अथ श्रीरामचन्द्रस्य यद्धाम प्रकृतेः परम् ॥
सच्चिद्घनपरानंदं नित्यं साकेतसंज्ञिकम् ॥ २७ ॥
यदंशवैभवा लोका वैकुंठाद्याः सनातनाः ॥ २८ ॥

सप्तावरणानि तस्याहं वक्ष्यामि मुनिसत्तम ॥
एकैकस्यां दिशि श्रीमान्दशयोजनसंमितः ॥ २९ ॥
अयोध्याया वहिर्देशः स वै गोलोकसंज्ञकः ॥
महाशंभुर्महाब्रह्मा महेन्द्रो वरुणस्तथा ॥ ३० ॥
धनदो धर्मराजश्च महांतश्च दिगीश्वराः ॥
त्रयस्त्रिंशत्तथा देवा गंधर्वाश्चाप्सरोगणाः ॥ ३१ ॥
अन्ये च विविधा देवा नित्याः सर्वे द्विजोत्तम ॥
सप्तर्षयो मुनीन्द्राश्च नारदः सनकादयः ॥ ३२ ॥
वेदा मूर्त्तिधराः शास्त्रविद्याश्च विविधास्तथा ॥
सायुधाः सगणाः श्रीमद्रामभक्तिपरायणाः ॥ ३३ ॥
प्रथमावरण नित्यं साकेतस्य स्थिता मुने ॥
एतदंशसमुद्भूते देवा ब्रह्मशिवादयः ॥ ३४ ॥
यथाऽधिकारं ते सर्वे स्वस्वलोकेषु संस्थिताः ॥
निधयो नवधा नित्या दशाष्टौ सिद्धयस्तथा ॥ ३५ ॥
पंचधामुक्तयश्चापि रूपवत्यः पृथक्पृथक् ॥
कर्मयोगौ च वैराग्यं ज्ञानं च साधनैः सह ॥ ३६ ॥
द्वितीयाऽवरणे नित्यं स्वस्वरूपणे संस्थिताः ॥
सच्चिज्ज्योतिर्मयं ब्रह्म निरीहं निर्विकल्पकम् ॥ ३७ ॥
निर्विशेषं निराकारं ज्ञानाकारं निरंजनम् ॥
निर्वाच्यं निर्गुणं नित्यमनंतं सर्वसाक्षिकम् ॥ ३८ ॥
इन्द्रियैर्विषयैः सर्वैरग्राह्यं तत्प्रकाशकम् ॥
न्यासिनां योगिनां यच्च ज्ञानिनां च लयास्पदम् ॥ ३९ ॥
तृतीयावरणे तद्वै साकेतस्य विदुर्बुधाः ॥
गर्भोदकनिवासी च क्षीरार्णवनिवासकृत् ॥ ४० ॥

श्वेतद्वीपाधिपश्चैव रमावैकुंठनायकः ॥
सलोकाः सगणाः सर्वे मथुरा च महापुरी ॥ ४१ ॥
पुरी द्वारावती नित्या काशी लोकैकवंदिता ॥
कांची मायापुरी दिव्या तथा चावंतिकापुरी ॥ ४२ ॥
अयोध्यामेव सेवंते चतुर्थावरणे स्थिताः ॥
साकेतपूर्वदिग्भागे श्रीमतीमिथिलापुरी ॥ ४३ ॥
सर्वाश्चर्य्यवती नित्या सच्चिदानंदरूपिणी ॥
हर्म्यैः प्रासादवर्य्यैश्च नानारत्नपरिष्कृतैः ॥ ४४ ॥
विमानैर्विविधैरुच्चैश्चित्रध्वजपताकिभिः ॥
भ्राजते परिखादुर्गविविधोद्यानसंकुला ॥ ४५ ॥
तस्यां श्रीमन्महाराज शीरकेतुः प्रतापवान् ॥
श्वशुरो रामचन्द्रस्य वात्सल्यादिगुणार्णवः ॥ ४६ ॥
निमिवंशध्वजः शूरश्चतुरंगबलान्वितः ॥
वेदवेदांतसारज्ञः सर्वशास्त्रविशारदः ॥ ४७ ॥
धनुर्वेदविदां श्रेष्ठः सर्वैश्वर्य्यसमन्वितः ॥
दासीदासगणैर्नित्यं सेवितो वसति स्वराट् ॥ ४८ ॥
दक्षिणस्यां दिशि श्रीमान् कोशलाया गिरिर्महान् ॥
भ्राजते चित्रकूटः सच्चिन्मयानंद मूर्तिमान् ॥ ४९ ॥
नानारत्नमयः शृंगैर्विचित्रैश्चित्रपादपैः ॥
सुधास्वादुफलै रम्यैः पुष्पभारावलंबिभिः ॥ ५० ॥
लताजालवितानैश्च गुंजद्भ्रमरसंकुलैः ॥
मत्तकोकिलसन्नादैः कूजद्भिश्चित्रपक्षिभिः ॥ ५१ ॥
नृत्यन्मत्तमयूरैश्च निर्झरैर्निर्मलांबुभिः ॥
सीतया सह रामस्य लीलारसविवर्द्धनः ॥ ५२ ॥

चिद्रूपा कांचनी भूमिः समा रत्नैर्विचित्रिता ॥
समंतात्पर्वतेन्द्रस्य दिव्यकाननमंडिता ॥ ५३ ॥
यत्र मंदाकिनी रम्या वहति श्रीमती नदी ॥
मणिनिर्मलतोयाढ्या वज्रवैडूर्य्यवालुका ॥ ५४ ॥
गुंजन्मधुव्रतश्रेणी प्रफुल्लकमलाकुला ॥
चित्रपक्षिकलक्काणमुखरीकृतदिक्तटा ॥ ५५ ॥
स्वर्णस्फटिकमाणिक्यमुक्तावद्धतटद्वया ॥
चित्रपुष्पलतापुंजकुंजानि विविधानि च ॥ ५६ ॥
मधुराणि सहस्राणि तस्यास्तीरद्वयोरपि ॥
संति नित्यविहारार्थं जानकीरामचन्द्रयोः ॥ ५७ ॥
अयोध्यापश्चिमे भागे कृष्णस्य परमात्मनः ॥
नित्यं वृन्दावनं धाम चिन्मयानंदमद्भुतम् ॥ ५८ ॥
समंताद्भूः समा यत्र कांचनी रत्नचित्रिता ॥
दिव्यवृक्षलताकुंजैर्गुंजन्मत्तमधुव्रतैः ॥ ५९ ॥
नवीनैः पल्लवैः स्निग्धैः फलैः पुष्पैश्च संन्नतैः ॥
नदत्पक्षिगणैश्चित्रैर्मयूरैश्च विराजते ॥ ६० ॥
गोवर्द्धनो गिरिश्चात्र कांचनो रत्नमंडितः ॥
लतापादपसंकीर्णो गुहानिर्झरकूटवान् ॥ ६१ ॥
नदी यत्र महापुण्या कालिन्दी कृष्णवल्लभा ॥
नीलरत्नजलोत्तुंगतरंगावर्तमालिनी ॥ ६२ ॥
फुल्लपंकेरुहा मत्तकूजद्भृंगविहंगमा ॥
स्वर्णघट्टतटा रत्नवालुका शोभते भृशम् ॥ ६३ ॥
गोपीगोपगणैर्नित्यैर्गोवृन्दैर्गोपबालकैः ॥
श्रीमन्नंदयशोदाभ्यां भ्रात्रा श्रीमद्बलेन च ॥ ६४ ॥

सखीभिर्गोपकन्याभिर्वृषभानुसुतादिभिः ॥
सार्द्धं वसति तत्रैव श्रीकृष्णः पुरुषोत्तमः ॥ ६५ ॥
क्वणद्वेणुमनोहारी विहारी रासमण्डले ॥
श्रीराधिकामुखांभोजमकरंदमधुव्रतः ॥ ६६ ॥
सत्यायाश्चोत्तरे भागे महावैकुण्ठसञ्ज्ञकम् ॥
महाविष्णोः परं धाम ध्रुवं वेदैः प्रकीर्तितम् ॥ ६७ ॥
सर्वतः खचिता रत्नैर्भूमिर्यत्र हिरण्मयी ॥
वापी कुंडतडागैश्च दिव्यारामैर्विराजते ॥ ६८ ॥
समंताच्च नदी यत्र विरजा फुल्लपंकजा ॥
स्वच्छस्फटिकतोयौघावर्तोत्तुंगतरंगिणी ॥ ६९ ॥
स्वर्णरत्नमहातीर्था वज्रस्फटिकसैकता ॥
भृंगपक्षिगणोद्घुष्टकोलाहलसमाकुला ॥ ७० ॥
प्रासादैः पार्षदेन्द्राणां विमानैर्विविधैस्तथा ॥
चित्रशालोत्तमैर्दिव्यैर्हर्म्यजालैः सहस्रशः ॥ ७१ ॥
उच्चैर्ध्वजपताकाग्रै रत्नकांचनचित्रितैः ॥
ललनारत्नसंघैश्च तल्लोकं द्योततेऽधिकम् ॥ ७२ ॥
हैरण्यं सुमहद्रत्नैः खचितं परमायतम् ॥
तत्रैकं भवनं प्रांशुप्रासादैः परिवारितम् ॥ ७३ ॥
सहस्रैः कलशैर्भातं ध्वजैश्चित्रैश्च केतुभिः ॥
मुक्तादामवितानैश्च चित्ररत्नगवाक्षकैः ॥ ७४ ॥
महद्वज्रकपाटैश्च मणिस्तंभैः सहस्रशः ॥
रत्नांगणं महाकक्षं भाति तल्लोकभूषणम् ॥ ७५ ॥
तन्मध्ये शेषपर्यंके नित्यसत्त्वैकविग्रहः ॥
आस्ते नारायणो नित्यः किशोरः सद्गुणार्णवः ॥ ७६ ॥

मेघश्यामश्चतुर्बाहुस्तडित्पीताम्बरावृतः ॥
श्यामस्निग्धालकव्रातैरुल्लसन्मुखपंकजः ॥ ७७ ॥
महद्रत्नकिरीटेन कुण्डलांगदकंकणैः ॥
श्रीवत्सकौस्तुभाभ्यां च सुगंधैर्वनमालया ॥ ७८ ॥
वैजयंत्योपवीतेन मुद्रिकाहारनूपुरैः ॥
स्वर्णसूत्रेण कांच्यादिभूषणैर्भूषितो विभुः ॥ ७९ ॥
शंखचक्रगदापद्माद्यायुधैश्चाप्यलंकृतः ॥
विभाति श्रीमतीभिश्च श्रीभूलीलादिशक्तिभिः ॥ ८० ॥
विष्वक्सेनादयो नित्यमुक्ताऽमुक्ताश्च सूरयः ॥
शुद्धसत्त्वात्मकाः सर्वे श्यामलांगाश्चतुर्भुजाः ॥ ८१ ॥
दिव्यगंधानुलिप्तांगाः पद्माक्षाः पीतवाससः ॥
सुकेशा सुस्मिता दिव्यमाल्यालंकारभूषिताः ॥ ८२ ॥
सर्वायुधधरा दिव्यललनायूथसेविताः ॥
भगवंतं श्रिया जुष्टं सेवंतेऽहर्निशं मुदा ॥ ८३ ॥
मिथिला चित्रकूटश्च श्रीमद्वृंदावनं तथा ॥
महावैकुंठमेतद्धि पंचमावरणे मुने ॥ ८४ ॥
ततस्तु परमानन्दसंदोह परमाद्भुतम् ॥
अयोध्यायाश्चतुर्दिक्षु चतुर्विंशतियोजनम् ॥ ८५ ॥
सर्वतो वेष्टितं नित्यं स्वप्रकाशं परात्परम् ॥
सच्चिदेकरसानंदं मायागुणविवर्जितम् ॥ ८६ ॥
वाङ्मनोगोचरातीतं प्रमोदारण्यसंज्ञकम् ॥
रामस्यातिप्रियं धाम नित्यलीलारसास्पदम् ॥ ८७ ॥
जाम्बूनदमयी यत्र भूः समंतात्प्रकाशते ॥
चिद्रूपिणी समा श्लक्ष्णा परानंदविवर्द्धिनी ॥ ८८ ॥

चन्द्रकांतोपलैश्चित्रा क्वचिच्च स्फटिकोपलैः ॥
मणिभिः पद्मरागैश्च क्वचिद्धैमैर्महाप्रभैः ॥ ८९ ॥
इन्द्रनीलोपलैर्बद्धा माणिक्यैर्विविधैः क्वचित् ॥
रत्नैर्वंशच्छदैर्भातैर्वैडूर्य्यैः खचिता क्वचित् ॥ ९० ॥
अविद्धाभिश्च मुक्ताभिः प्रवालैश्च क्वचित्क्वचित् ॥
महार्हैश्चित्रिता रत्नैर्नीलपीतसितारुणैः ॥ ९१ ॥
स्यमंतैर्भ्राजमानैश्च चिंतारत्नचयैस्तथा ॥
चित्रिता वसुधा सर्वा द्योतयत्यधिकं प्रियम् ॥ ९२ ॥
पूर्वादिषु चतुर्दिक्षु क्रमेण तद्वने मुने ॥
गिरयः संति चत्वारस्तेषां नामानि मे शृणु ॥ ९३ ॥
शृंगाराद्रिश्च रत्नाद्रिस्तथा लीलाऽद्रिरेव च ॥
मुक्ताद्रिश्च स्वया लक्ष्म्या द्योतयंति दिशो दश ॥ ९४ ॥
आह्लादिन्याश्च पूर्वस्यां दिशि प्रोद्यत्प्रभाकरः ॥
नीलरत्नमयो भाति शृंगाराद्रिर्मनोहरः ॥ ९५ ॥
दक्षिणस्यां दिशि श्रीमद्रत्नाद्रिर्द्योतयन् वनम् ॥
पीतरत्नमयः कांत्या भूदेव्या भ्राजते प्रियः ॥ ९६ ॥
प्रतीच्यां दिशि लीलाद्रिर्लीलाया ललितप्रभा ॥
राजते रक्तरत्नाढ्यो रामस्य रतिवर्द्धनः ॥ ९७ ॥
श्रीदेव्याश्च हि लीलार्थे मुक्ताद्रिर्मण्डितो महान् ॥
उदीच्यामुज्वलो रत्नैश्चन्द्रकांतैरुदंचते ॥ ९८ ॥
चित्रपुष्पौघसंपन्नैर्लतापुंजवितानकैः ॥
स्वल्पीकृतसुधास्वादुफलभारातिसंनतैः ॥ ९९ ॥
नवीनपल्लवोपेतैर्गुञ्जन्मत्तमधुव्रतैः ॥
कूजच्चित्रद्विजैर्नीलकठकेकीविनादितैः ॥ १०० ॥
प्रमत्तकोकिलाक्वाणमुखरीकृतदिङ्मुखैः ॥
विचित्रैर्विविधैः स्निग्धैर्वृक्षैर्नित्यमधुव्रतैः ॥ १०१ ॥

उन्नतैः शिखरैर्भातैः स्यंदमानैश्च निर्झरैः ॥
गुहाभिश्च विराजंते चत्वारस्ते नगोत्तमाः ॥ १०२ ॥
तत्प्रमोदवने संति मधुराणि नवानि च ॥
वनानि द्वादशैतानि तन्नामानि शृणुष्व मे ॥ १०३ ॥
श्रीशृंगारवनं भातं विहारवनमद्भुतम् ॥
तमालं च रसालं च चंपकं चंदनं तथा ॥ १०४॥
पारिजातवनं दिव्यमशोकवनमुत्तमम् ॥
विचित्राख्यं वनं कांतं कदम्बवनमेव च ॥ १०५ ॥
तथाऽनंगवनं रम्यं वनं श्रीनागकेशरम् ॥
द्वादशैतानि नामानि वनानां कथितानि ते ॥ १०६ ॥
सर्वेषु सान्द्रनीलाभ्रनिभेषु विपिनेषु च ॥
निबिडेषु नवा नित्या विचित्रा विविधा द्रुमाः ॥ १०७ ॥
चिन्मयाः कमनीयाश्च किशोराः कामविग्रहाः ॥
सुस्निग्धाः कोमलाः सूक्ष्माश्च्योतंत्यमृतविप्रुषः ॥१०८॥
नवीनैः पल्लवैः श्लक्ष्णैर्मृदुलैर्वायुचंचलैः ॥
विचित्रैर्लवितैर्नीलहरित्पीतारुणैर्वनैः ॥ १०९ ॥
पुष्पाणां पंचवर्णानां दिव्यानां च सुगंधिना ॥
नवानामप्रमेयाणां नित्यानामभितो भृशम् ॥ ११० ॥
प्रफुल्लानां सुधास्वादुफलानां च विशेषतः ॥
महाभारेण शाखाभिर्लुठंति धरणीतले ॥ १११ ॥
दिव्यस्वर्णमहारत्नजालैश्चित्रितवेदिकाः ॥
प्रफुल्लपंचधा पुष्पव्रतत्यौघवितानकाः ॥ ११२ ॥
सुवर्णवल्कलाः केचिन्मुक्तापुष्पावतंसकाः ॥
चिंतामणिफला नीलरत्नपल्लवशोभिताः ॥ ११३ ॥
नानापुष्परजःपृक्तशबलाः षट्पदा मुदा ॥
अनंता यत्र गुंजंति भ्रमंतो गंधगृध्नवः ॥ ११४ ॥

मत्ताः पुष्परसं पीत्वा पतंति पृथिवीतले ॥
पुनरुत्थाय धावंति पुष्पौघेषु मुहुर्मुहुः ॥ ११५ ॥
प्रविलीय पलायन्ते द्रुममन्यत्र यूथशः ॥
भ्रमरीभिः समं सर्वे विक्रीडंते समं ततः ॥ ११६ ॥
अनंता निर्वृता मत्ताः क्वचित्कूजंति कोकिलाः ॥
शारिकाश्च शुकाश्चित्राः क्वचिद्गायंति संघशः ॥ ११७ ॥
क्वचित्पारावतव्राताः कपोताश्च क्वणंति हि ॥ ११८ ॥
रटंति रागिणोत्यंतं चंचलाश्चातकाः क्वचित् ॥
चन्द्रमण्डलसंकाशाः प्रमदाभिर्मुदान्विताः ॥ ११९ ॥
हंसा मुक्ता अनंतं वै नदंति मधुरं क्वचित् ॥
क्वचित्क्रौंचाश्चकोराश्च कलहंसाश्च सारसाः ॥ १२० ॥
विचित्राः पक्षिणश्चान्ये स्वयोपिद्भिर्मनोहराः ॥
रमंते नादयंतश्च वनं नानारवैर्भृशम् ॥ १२१ ॥
तिरस्कृताऽमृतस्वादुफलानि विविधानि च ॥
अदंति तेषु सर्वेषु विचित्रेषु वनेषु च ॥ १२२ ॥
प्रनृत्यंति मयूरीभिः सार्द्धं मत्ताः शिखंडिनः ॥
नित्यं श्रीकर्णिकाराश्च कुन्दवृन्दाश्च मल्लिकाः ॥ १२३ ॥
लवंगलतिका जात्यो मालत्यो यूथिकास्तथा ॥
माधव्यश्चैव केतक्यो वासंत्यः परमाद्भुतम् ॥ १२४ ॥
स्थलजाः कंजवृंदाश्च सेवंत्यो विविधास्तथा ॥
अन्याश्चित्रा लताः स्वैः स्वैः पुष्पौघैर्विविधैर्भृशम् ॥ १२५ ॥
कारयंति वनं सर्वं दिव्यं गंधाधिवासितम् ॥
वाताश्च शीतला मंदा सुगंधास्तद्वने सदा ॥ १२६ ॥
प्रवांति परमानन्दं वर्द्धनाः षट्पदानुगाः ॥
नानापुष्परजोभिश्च रंजिता भूर्विराजते ॥ १२७ ॥

क्वचित्पीता क्वचिन्नीला हरिद्रक्ता सिता क्वचित् ॥
पादपप्रच्युतैः पुष्पैस्सञ्छन्ना पंचवर्णकैः ॥ १२८ ॥
कुथेवाभाति विस्तीर्णा चित्रवर्णा क्वचित्क्वचित् ॥
दीर्घिका विविधास्तत्र मणिनिर्मलवारिणा ॥ १२९ ॥
पूर्णा माणिक्यसोपानाः स्फटिकोपलकुट्टिमाः ॥
तीरस्थद्रुमसंछन्नाः प्रफुल्लकमलोत्पलाः ॥ १३० ॥
कूजत्पक्षिगणैश्चित्रैर्गुंजद्भृंगैर्विनादिताः ॥
फुल्लपंकजकल्लोलजला गुंजन्मधुव्रताः ॥ १३१ ॥
पुष्करिण्यो द्विजोद्घुष्टद्रुमगुल्मलतावृताः ॥
तटाकानि सुरम्याणि विशालानि वने वने ॥ १३२ ॥
विचित्रमणिसोपानतीर्थानि विविधानि च ॥
कुण्डानि कमनीयानि संति स्फटिकवारिभिः ॥ १३३ ॥
पूर्णानि फुल्लकह्लारशतपत्राण्यनेकशः ॥
भृंगसंघप्रगीतानि शुकहंसरुतानि च ॥ १३४ ॥
संनादितवनांतानि नदद्भिश्चित्रपक्षिभिः ॥
प्रासादा मण्डपाः सांद्राः काननानां क्वचित्क्वचित् ॥१३५॥
मध्ये मध्ये प्रदीप्यंते वेदिका विविधास्तथा ॥
कांचनाश्चंद्रकांतैश्च मणिभिश्चित्रिताः क्वचित् ॥१३६॥
चिंतारत्नैः क्वचिन्चेन्द्रनीलरत्नैर्विचित्रिताः ॥
पद्मरागप्रवेकैश्च क्वचिद्वज्रैः स्फुरत्प्रभैः ॥ १३७ ॥
वैडूर्य्यैर्भासमानैश्च स्यंमतैः खचिताः क्वचित् ॥
क्वचिद्वंशच्छदैर्भातैर्माणिक्यैश्च मनोहरैः ॥ १३८ ॥
हरिद्रत्नैश्च मुक्ताभिः प्रवालैश्चापि मंडिताः ॥
अन्यैर्विचित्ररत्नैश्च मृदुलास्तृणैस्तथा ॥ १३९ ॥
मुक्तादामवितानैश्च दर्पणैश्चाप्यलंकृताः ॥
मुक्तापुष्पलताजालकुंजानि मधुराण्यलम् ॥ १४० ॥

भृंगपक्षिप्रघुष्टानि तद्वने संत्यनेकशः ॥
वसंतो हि क्वचित्तत्र नित्यमेव विराजते ॥ १४१ ॥
निदाघश्च क्वचित्प्रावृट् क्वचिन्नित्यं शरत्तथा ॥
हेमंतश्च क्वचिन्नित्यं शिशिरो वर्त्तते क्वचित् ॥ १४२ ॥
षडेते ऋतवः स्वस्वभूत्या वै संवसंति हि ॥
देशीदेवगिरिश्चैव वैराडी टोडिका तथा ॥ १४३ ॥
ललिता चैव हिंडोली रागिण्यः षट् प्रकीर्तिताः ॥
मूर्तिमंतीभिरेताभिः स्वपत्नीभिर्मनोहराः ॥ १४४ ॥
वसंतो मूर्तिमान्रागो वसंते वसते सदा ॥
भैरवी गुर्ज्जरी चैव रेवा गुणकरी तथा ॥ १४५ ॥
वंगाक्षी व्रह्वुली चैव रागिण्यः षट् सुविग्रहाः ॥
एताभिः स्वसहायाभिर्योपिद्भिर्भैरवोऽद्भुतः ॥ १४६ ॥
रामः संवर्तते नित्यं निदाघे मूर्तिमान्स्वयम्
मल्लारी शोरठी चैव सावेरी कौशिकी तथा ॥ १४७ ॥
गंधारी हरिशृंगारा रागिण्यः षट् सुखप्रदाः ॥
सुरूपाभिःस्वभार्याभिरेताभिर्मूर्तिमान्महान् ॥ १४८ ॥
प्रावृषि प्रीतिकृन्नित्यं मेघरागप्रतिष्ठितः ॥
विभासी चाथ भूपाली मालश्रीः पटमंजरी ॥ १४९ ॥
वडहंसी च कर्णाटी रागिण्योऽद्भुतविग्रहाः ॥
स्वदारैः षड्भिरेताभिः पुत्रपौत्रस्नुषादिभिः ॥ १५० ॥
रूपवान्पंचमो रागः सर्वदा शरदि स्थितः ॥
कामोदी चापि कल्याणी ह्याभीरी नाटिका तथा ॥ १५१ ॥
सालंगी नटहंमीरी रागिण्यः सुरतिप्रदाः ॥
दिव्यरूपाभिरेताभिः स्वस्त्रीभिर्दिव्यरूपवान् ॥ १५२ ॥

हेमंते तिष्ठते रागो बृहन्नाटश्च नित्यदा ॥
मालवी त्रिवर्णी गौरी केदारी मधुमाधवी ॥ १५३ ॥
तथा पाहाडिका चैव रागिण्यः श्रुतिवल्लभाः ॥
षड्भिर्मूर्तिमतीभिः स्वनायिकाभिश्च मूर्तिमान् ॥ १५४ ॥
शिशिरे संस्थितो नित्यं श्रीरागः सकुटुंबकः ॥
रागाः षट् पुरुषाश्चेत्थं षट् त्रिंशच्च तथा स्त्रियः॥१५५॥
रागिण्यः परिवारैश्च निवसंति सदा वने ॥
प्रमोदकाननं षष्ठमेतदावरणं महत् ॥ १५६ ॥
तव भक्त्या प्रसन्नेन मया प्रोक्तं द्विजोत्तम ॥
ततश्च सरितामादिकारणं सरयूः सरित् ॥ १५७ ॥
श्रीमती शाश्वती नित्या सर्वलोकैकपावनी ॥
सच्चिद्घनपरानन्दरूपिणी रामवल्लभा ॥ १५८ ॥
विरजाद्याः परा नद्यो यदंशाल्लोकविश्रुताः ॥
यन्नामोच्चारणात्सद्यो मुक्ता संसारबंधनात् ॥ १५९ ॥
प्राप्नुयुर्दिव्यदेहांश्च समीतं रघुनन्दनम् ॥
तज्जलं निर्मलं कांतं गंभीरावर्तशोभितम् ॥ १६०॥
उत्तुंगविलसद्वीचिधवलीकृतदिङ्मुखम् ॥
मंदीकृतशरच्चन्द्रचयं चन्द्रमणिप्रभम् ॥ १६१ ॥
तिरस्कृतसुधास्वादु कुन्दवृन्दहिमद्युति ॥
प्रफुल्लैः पङ्कजै रक्तैः शुक्लैः पीतैस्तथासितैः ॥ १६२ ॥
अन्यैर्नानाविधैर्दिव्यैः सुगंधीकृतमद्भुतम् ॥
हंसैः क्रौंचैश्चकोरैश्च चक्रवाकश्च सारसैः ॥ १६३ ॥
सदारैरतिकूजद्भिश्चित्रैश्चान्यैः पतत्रिभिः ॥
भ्रमद्भिर्भ्रमरैर्मत्तैर्गुंजद्भिर्मधुरस्वरैः ॥ १६४ ॥
मत्ताभिर्भ्रमरीभिश्च समंतान्मुखरीकृतम् ॥
मणिभिश्चन्द्रकांतैश्च पद्मरागैश्च कौस्तुभैः ॥ १६५ ॥

क्वचिद्वंशच्छदैर्वज्रैश्चेन्द्रनीलैःस्यमंतकैः ॥
चिंतारत्नैश्च वैडूर्य्यैर्मुक्ताभिः स्फटिकैः क्वचित् ॥ १६६ ॥
माणिक्यैश्च क्वचिद्रत्नैर्नानावर्णैः सकांचनैः ॥
खचितानां सुतीर्थानां सहस्राणां तटद्वये ॥ १६७ ॥
प्रतिबिंबैर्जलं स्वच्छं नानावर्णं प्रकाशते ॥
वज्रस्फटिकमुक्तानां सूक्ष्मचूर्णानि वालुकाः ॥ १६८ ॥
तथा:चन्द्रमणीनां च द्योतयंति सरित्तटे ॥
एवं श्रीसरयू रम्या परमानंददायिनी ॥ १६९ ॥
सप्तमावरणं विद्धि साकेतस्य सरिद्वरा ॥
सप्तावरणमध्ये तु राजते रामवल्लभा ॥ १७० ॥
अयोध्यानगरी सच्चित्सांद्रानन्दैकविग्रहा ॥
इतीदं वर्णितं नित्यं सप्तावरणसंयुतम् ॥
रामधामैकसिद्धांतं स्वरूपं मुनिसत्तम ॥ १७१ ॥
पठेद्वा शृणुयान्नित्यं य एतद्भक्तिसंयुतः ॥
स गच्छेत्परमं धाम साकेतं योगिदुर्लभम् ॥ १७२ ॥
ज्ञानं योगश्च ध्यानं च तपश्चात्मविनिग्रहः ॥
नाना यज्ञाश्च दानानि सर्वतीर्थावगाहनम् ॥ १७३ ॥
एतस्य पाठमात्रेण श्रवणेन च यत्फलम् ॥
भवेत्तस्य कलां विप्र साहस्रामपि नाप्नुयुः ॥ १७४ ॥

श्रीभरद्वाज उवाच ॥

तत्त्वामृतं पीतमनन्यचेतसा सुधाधिकं त्वन्मुखनिर्गतं मया ॥
न्योस्म्यहं नाथ पदद्वयं प्रभो नमामि नित्यं च तवास्मि किंकरः ॥

इति श्रीमद्वशिष्ठसंहितायां श्रीमद्वशिष्ठभरद्वाजसंवादे श्रीमद्रामधाम-
नित्यस्वरूपवर्णनो नाम षड्विंशतितमोऽध्यायः ॥ २६ ॥

यस्यांशेनैव ब्रह्मविष्णुमहेश्वरा अपि जाता महाविष्णुर्य्यस्य दिव्यगुणाश्च ॥ स एव कार्यकारणयोः परः परमपुरुषो रामो दाशरथिर्बभूव ॥इत्यथर्वणे श्रुतिः ॥ स श्रीरामः सवितारी सर्वेषामीश्वरः, यमेवेष वृणुते स पुमानस्तु, यमवैदस्माद्भूर्भुवः स्वः त्रिगुणमयो बभूव, इतीमं नरहरिः स्तौतीमं गंधमादनः, स्तौतीमं यज्ञतनुः, स्तौतीमं महाविष्णुः, स्तौतीमं विष्णुः, स्तौतीमं महाशंभुः, स्तौतीमं द्वैतं मण्डलं तपति यत्पुरुषं दक्षिणाक्षं मण्डलो वै मण्डलार्च्यः मण्डलस्थमिति सामवेदे तैत्तिरीयशाखायाम् ॥

(परमोपदेशः)

अल्प तो अवधि जीव तामें बहु सोच, पोच, करिबेको बहुत है काह काह कीजिये । पार तो पुरानहुंको वेदहुंको अन्त नाहि, बानीहू अनेक चित कहां कहां दीजिये ॥ काव्यको कला अनंत, छन्दको प्रबंध घनो, रागतो रसीले रस कहां कहां पीजिये । सब बातोंकी एक बात तुलसी बताए जात, जन्म जो सुधारा चहो राम नाम लीजिये ॥

इति श्रीअयोध्यापुरीस्थित कनकभवननिवासी वैष्णव श्रीसरयूदासजी कृत श्रीउपासनात्रयसिद्धांतरहस्य समाप्त ॥ श्रीसीतारामचन्द्रार्पणमस्तु शुभं भवतु ॥

पुस्तक मिलनेका पता-
वैष्णव श्रीसरयूदासजी,
कनकभवन-अयोध्या.